( यथा, रामायणे । २ । ६५ । ६ ।
"क्वचिन्मणिनिकाशोदां क्वचित् पुलिनशालिनीम् ।
क्वचित् सिद्धजनाकीर्णां पश्य मन्दाकिनीं नदीम् ॥" )
जलादचिरोत्थितं तटम् । इति भरतः ॥ तत्-च्युततोययुक्तद्वीपम् । इति सुभूतिः ॥ क्रमेणोत्थितं तटम् । इति स्वामी ॥ जलमध्यस्थमुत्थितं तटम् । इति पञ्जिका ॥ द्वीपम् । इति त्रिकाण्डशेषः ॥ ( यक्षविशेषे, पुं । यथा, महाभारते । १ । ३२ । १८ ।
"उलूकश्वसनाभ्याञ्च निमिषेण च पक्षिराट् ।
प्ररुजेन च संग्रामं चकार पुलिनेन च ॥" )

पुलिन्दः, पुं, (पुल महत्त्वे + "कुणिपुल्योः किन्दच् ।" उणा० ४ । ८५ । इति किन्दच् । ) चण्डाल-भेदः । स च म्लेच्छशब्दवाच्यः । इत्यमरभरतौ ॥
तस्योत्पत्तिर्यथा,—
पुलस्त्य उवाच ।
"एवं गतेषु त्रैलोक्यं दानवेषु पुरन्दरः ।
जगाम ब्रह्मसदनं सह देवैः शचीपतिः ॥
तत्रापश्यत् स देवेशं ब्रह्माणं कमलोद्भवम् ।
ऋषिभिः सार्द्धमासीनं पितरं स्वञ्च कश्यपम् ॥
ततो ननाम शिरसा शक्रः सुरगणैः सह ।
ब्रह्माणं कश्यपञ्चैव तांश्च सर्व्वांस्तपोधनान् ॥
प्रोवाचेन्द्रः सुरैः सार्द्धं देवनाथं पितामहम् ।
पितामह ! हृतं राज्यं बलिना बलिना मम ॥
ब्रह्मा प्रोवाच शक्रैतत् भुज्यते स्वकृतं फलम् ।
शक्रः पप्रच्छ भो ब्रूहि किं मया दुष्कृतं कृतम् ॥
कश्यपोऽप्याह देवेश ! भ्रूणहत्या कृता त्वया ।
दितेरुदरात्त्वया गर्भः कृतो वै बहुधा बलात् ॥
पितरं प्राह देवेन्द्रो मातुर्दूषयतो विभो ! ।
कर्त्तनं प्राप्तवान् गर्भो यदशौचा हि साभवत् ॥
ततोऽब्रवीत् कश्यपस्तु मातुर्दोषे सदासताम् ।
गतस्ततो विनिहतो दोषोऽपि कुलिशेन भोः ॥
तच्छ्रुत्वा कश्यपवचः प्राह शक्रः पितामहम् ।
विनाशं पाप्मनो ब्रूहि प्रायश्चित्तं विभो ! मम ॥
ब्रह्मा प्रोवाच देवेशं वशिष्ठः कश्यपस्तथा ।
हितं सर्व्वस्य जगतः शक्रस्यापि विशेषतः ॥
शङ्खचक्रगदापाणिर्माधवः पुरुषोत्तमः ॥
तं प्रपद्यस्व शरणं स ते श्रेयो विधास्यति ॥
सहस्राक्षोऽपि वचनं गुरूणां स निशम्य वै ।
प्रोवाच स्वल्पकालेन कस्मिन् प्राप्यो वकूदयः ॥
ता ऊचुर्देवता मर्त्त्यै स्वल्पकाले वकूदयः ॥
इत्येवमुक्तः सुरराड्विरिञ्चिना
मरीचिपुत्त्रेण च कश्यपेन ।
तथैव मित्रावरुणात्मजेन
वेगान्महीपृष्ठमवाप्य तस्थौ ॥
कालञ्जरस्योत्तरतः सुपुण्य-
स्तथा हिमाद्रेरपि दक्षिणस्याम् ।
कुशस्थलात् पूर्व्वत एव विश्रुतो
वसोः पुरात् पश्चिमतोऽवतस्थे ॥
यत्राथ चक्रे भगवान् मुरारि-
र्वास्त्वमशक्तातनुस्वमूर्त्तिः ।
ख्यातिं जगामाथ गदाधरेति
महाघवृन्दस्य शितः कुठारः ॥
यस्मिन् द्विजेन्द्राः श्रुतिशास्त्रसंयुताः
समागता यान्ति पितामहेन ।
मरुत्पितॄन् यत्र च संप्रपूज्य
भक्त्या त्वनन्ये नहि चेतसैव ।
फलम्महामेधमखस्य मानवा
लभन्त्यनन्त्यं भगवत्प्रसादात् ॥
महानदी यत्र सुरर्षिकन्या
शालापदेशाद्धिमशैलमेत्य ।
चक्रे जगत् पापविनष्टमग्र्यं
सन्दर्शनप्राशनमज्जनेन ॥
तत्र शक्रः समभ्येत्य महानद्यास्तटेऽद्भुते ।
आराधनाय देवस्य कृत्वाश्रममवस्थितः ॥
प्रातःस्नायी त्वधःशायी एकभक्तिर्ह्ययाचितः ।
तपस्तेपे सहस्राक्षः स्तुवन् देवं गदाधरम् ॥
तस्यैवं तप्यतः सम्यक् जितसर्व्वेन्द्रियस्य च ।
कामक्रोधविहीनस्य साग्रः संवत्सरो गतः ॥
ततो गदाधरः प्रीतो वासवं प्राह नारद ! ।
गच्छ प्रीतोऽस्मि भवतो मुक्तपापोऽसि साम्प्रतम् ॥
निजं राज्यञ्च देवेश ! प्राप्स्यसि त्वचिराद्दिवः ।
यतिष्यामि यथा शक्र ! भाविश्रेयो यथा तव ॥
इत्येवमुक्तोऽथ गदाधरेण
विसर्जितः प्राप्य मनोहरायाम् ।
स्नातस्य देवस्य ततः पुरस्तात्
संप्रोचुरस्मानुशासयस्व ॥
प्रोवाच तान् भीषणकर्म्मकारान्
नाम्ना पुलिन्दा मम पापसम्भवाः ।
वसध्वमेवान्तरमद्रिमुख्ययो-
र्हिमाद्रिकालाञ्जरयोः पुलिन्दाः ॥
इत्येवमुक्त्वा सुरराट् पुलिन्दान्
विमुक्तपापः सुरसिद्धयक्षैः ।
संपूज्यमानोऽनुजगाम चाश्रमं
मातुस्तदा धर्म्मनिवासमाद्यम् ॥"
इति वामने ७१ अध्यायः ॥

पुलोमजा, स्त्री, ( पुलोम्नो दैत्यात् जायते इति । जन + डः ।) शची । इत्यमरः । १ । १ । ४८ ॥ ( यथा, काशीखण्डे १० अध्याये ।
"नियमाढ्यं क्रतुशतं यः कश्चित् कुरुतेऽवनौ ।
जितेन्द्रियोऽमरावत्यां स प्राप्नोति पुलोमजाम् ॥")

पुलोमजित्, पुं, ( पुलोमानं जयतीति । जि + क्विप् तुगागमश्च । ) इन्द्रः । इति केचित् ॥

पुलोमद्विट्, [ ष् ] पुं, ( पुलोम्नो दैत्यविशेषस्य द्विट् शत्रुः ।) इन्द्रः । इति हेमचन्द्रः ।२।८८ ॥

पुलोमभित्, [ द् ] पुं, ( पुलोमानं भिनत्तीति । भिद् + क्विप् । ) इन्द्रः । इति भूरिप्रयोगः ॥

पुलोमा, [ न् ] पुं, असुरविशेषः । स इन्द्रस्य श्वशुरः । इति पुलोमजाशब्दटीकायां भरतः ॥ ( अयं खल्विन्द्रेण निपातितः । यथा, हरिवंशे । २० । १३४ ।
"हत्वा सम्बन्धकं चापि विश्वसेच्छनुना नहि ।
पुलोमानं जघानाजौ जामाता सन् शत-क्रतुः ॥" )

पुलोमारिः, पुं, ( पुलोम्नोऽरिः शत्रुः । ) इन्द्रः । इति त्रिकाण्डशेषः ॥

पुष, पुष्टौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) पोषति तातः पुत्त्रम् । इति दुर्गादासः ॥

पुष, ऌ य औ पुष्टौ । पोषणे । इति कविकल्पद्रुमः ॥ ( दिवा०-पर०-सक०-अनिट् । ) ऌ, अपुषत् । य, पुष्यति । औ, पोष्टा । इति दुर्गादासः ॥

पुष, क धृतौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, पोषयति । इति दुर्गादासः ॥

पुष, श पुष्टौ । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-सेट् । ) श, पुष्णाति पुपोष । इति दुर्गादासः ॥

पुषा, स्त्री, ( पुष्णातीति । पुष पुष्टौ + कः । ततष्टाप् । ) लाङ्गलिकीवृक्षः । इति शब्दचन्द्रिका ॥

पुषितं, त्रि, ( पुष्यते स्मेति । पुष + क्तः । भ्वादिगणीयत्वात् इट् । ) पुष्टम् । कृतपोषणपक्षि-मृगादि । इत्यमरः । ३ । १ । ६७ ॥

पुष्करं, क्ली, ( पुष्णातीति । पुष पुष्टौ + "पुषः कित् ।" उणा० ४ । ४ । इति करन् । स च कित् । ) हस्तिशुण्डाग्रम् । (यथा, माघे ।५।३०।
"आलोलपुष्करमुखोल्लसितैरभीक्ष्ण-
मुक्षाम्बभूवुरभितो वपुरम्बुवर्षैः ॥" )
वाद्यभाण्डमुखम् । ( यथा, रघुः । १७ । ११ ।
"नदद्भिः स्निग्धगम्भीरं तूर्य्यैराहतपुष्करैः ॥" * ॥
"पुष पुष्टौ । पुषः कित् । इति करन्प्रत्ययः । पुषिरत्रान्तर्नीतण्यर्थः । पोषयति भूतान्यवकाश-प्रदानेन उदकदानाद्युपकारेण च । पुष्कं वारि रातीति पुष्करं इति क्षीरस्वामी । पुषेरन्त-र्ण्यर्थात् वृन्दभृशुषियुधिभ्यः कित् । इति विहितः करन्प्रत्ययो बाहुलकात् भवति । हृहसहपृथ्वीचीपुषिमुषिमृडमूभ्यः कित् । इति करु इति श्रीभोजदेवः । पोषयति भूतानीति । पुष्कोपपदाद्दातेः आतोऽनुपसर्गे कः । यद्वा, वपुरित्युदकनाम तत् कर्त्तुं शीलमस्येति । कृञो हेतुताच्छील्यानुलोम्येषु । इति टः । वपुष्करं सत् वकारलोपेन पुष्करम् । पृषोदरादिः ।" इति निघण्टौ देवराजयज्वा ॥) जलम् । (यथा, शत-पथब्राह्मणे । ६ । ४ । २ । २ ।
"आपो वै पुष्करं प्राणोऽथर्वा प्राणो वा ॥" )
व्योम । (यथा, हारीते प्रथमस्थाने चतुर्थेऽध्याये ।
"मेघाः सूर्य्यशिलासमानरुचयो ह्यल्पसवाल्प-स्तना
हंसालीकमलालिमण्डितजलः पद्माकरः शोभनः ।
तीव्रस्निग्धमयूखचन्द्रविमला स्वानन्दिनी कौमुदी
चित्रा घर्म्मविपक्कतोयसुरसा स्यान्निर्म्मलं पुष्करम् ॥")